# Shri Hariharaputra Sahasranama Abhishekamantram

# श्रीहरिहरपुत्रसहस्रनामाभिषेकमन्त्रम्

## Document Information


Text title : hariharaputrasahasranAmAbhiShekamantram

File name : hariharaputrasahasranAmAbhiShekamantram.itx

Category : deities_misc, ayyappa, sahasranAma

Location : doc_deities_misc

Proofread by : PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



July 10, 2021

*sanskritdocuments.org*

# श्रीहरिहरपुत्रसहस्रनामाभिषेकमन्त्रम्

प्राणापान-व्यानोदान-समाना मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ १॥

वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिस्सङ्कल्पा मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ २॥

त्वक्कर्म-मागंस-रुधिर-मेदो-मज्जा-स्नायवोऽस्थीनि मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ३॥

शिरःपाणि-पाद-पार्श्वपृष्ठोरूदर-जङ्घा-शिश्नोपस्थ-पायवो मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ४॥

पृथिव्यापस्तेजोवायुराकाशा मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ५॥

शब्द-स्पर्श-रूप-रस-गन्धा मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ६॥

(मनो-बुद्ध्यहङ्कारश्चित्तं मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥)
मनो-वाक्काय-कर्माणि मे शुध्यन्ताम् ।
ज्योतिरहं विरजा विपाप्मा भूयासगं स्वाहा ॥ ७॥

देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
अश्विनो भेषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ॥ ८॥

देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
सरस्वत्यै भेषज्येन वीर्यायान्नाद्यायाभिषिञ्चामि ॥ ९॥

देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
इन्द्रस्येन्द्रियेण श्रियै यशसे बलायाभिषिञ्चामि ॥ १०॥

इति श्रीहरिहरपुत्रसहस्रनामाभिषेकमन्त्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Hariharaputra Sahasranama Abhishekamantram*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*